# Mahakala Kshetra Mahima or Mahakalarchana Varnanam

# મહાકાલક્ષેત્રમહિમા અથવા મહાકાલાર્ચનવર્ણનમ્

## Document Information

Text title : Mahakala Kshetra Mahima or Mahakalarchana Varnanam

File name : mahAkAlakShetramahimAathavAmahAkAlArchanavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 4| 8-49||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 1, 2024

*sanskritdocuments.org*

# મહાકાલક્ષેત્રમહિમા અથવા મહાકાલાર્ચનવર્ણનમ્

મહાકાલમિદં ક્ષેત્રં મહેન્દ્રપ્રિયકૃત્તમમ્ ।
ભૂમણ્ડલેઽસ્ય સદૃશં ક્ષેત્રમન્યન્ન વિદ્યતે ॥ ૧॥

વિદ્યોતતે યથા ભાનુર્નભોઙ્ગણ (ઙ્ગણ) પથિ સ્થિતઃ ।
તથા ભૂમણ્ડલગતક્ષેત્રેષ્વેતદ્ વિરાજતે ॥ ૨॥

મહાકાલ મહાકાલ મહાકાલેતિ યો વદેત્ ।
સુદૂરેઽપિ ગતો મર્ત્યો મહાકાલાન્તિકે સ્થિતઃ ॥ ૩॥

લિઙ્ગં મઙ્ગલદં પુણ્યં મહામઙ્ગલયાર્ચિતમ્ ।
અર્ચિતં બ્રહ્મવિષ્ણ્વાદ્યૈર્મહાકાલગણાર્ચિતમ્ ॥ ૪॥

દૃષ્ટં શ્રુતં વા સતતં સ્પૃષ્ટમંહોવિનાશકમ્ ।
અયં મે હસ્ત ઇત્યાદિમન્ત્રસ્પર્શો વિશિષ્યતે ॥ ૫॥

ચૈત્ર્યાં માઘ્યાં તથાષાઢ્યાં પૌર્ણમ્યાં યસ્તુ પૂજયેત્ ।
સ વિમુક્તો મહાપાપાન્મુક્તિમન્તે વ્રજેત ચ ॥ ૬॥

યસ્તુ ચન્દનપઙ્કેન લિઙ્ગમેતદ્વિલેપયેત્ ।
કર્પૂરગરુકસ્તૂરીમિશ્રૈર્વા યક્ષકર્દમૈઃ ॥ ૭॥

તાલવૃન્તૈર્વીજયિત્વાઽગ્નિષ્ટોમફલભાગ્યવેત્ ।
બિલ્વપત્રૈશ્ચ પદ્મૈશ્ચ કલ્હારૈશ્ચમ્પકૈસ્તથા ॥ ૮॥

પૂજયિત્વા મહાલિઙ્ગં મહાકાલસ્ય શૂલિનઃ ।
સદ્યો મુચ્યેત પાપૈશ્ચ ગાણપત્યં લભેન્નરઃ ॥ ૯॥

અત્રોપોષ્ય મહાદેવં દૃષ્ટ્વા સાયં હવિષ્યભુક્ ।
બ્રહ્મહત્યાદિભિઃ પાપૈર્મુચ્યતે નાત્ર સંશયઃ ॥ ૧૦॥

ક્ષિપ્રાનદ્યુદકે સ્નાત્વા સન્તર્પ્ય પિતૃદેવતાઃ ।
ભોજયિત્વા દ્વિજાન્ શૈવાન્ ભક્ષ્યભોજ્યૈરનેકશઃ ॥ ૧૧॥

કોટિભોજ્યફલં તસ્ય ક્ષેત્રેઽસ્મિન્ શૈવસત્તમ ।
દત્વાથ તણ્ડુલં ધાન્યં તિલાન્ મુદ્ગાન્સ્તથાઢકાન્ ॥ ૧૨॥

ક્ષીરં દધિ ઘૃતં ક્ષૌદ્રં શર્કરાં વા ફલાનિ ચ ।
દત્વા શિવાય સ ભવેન્નિષ્પાપો નાત્ર સંશયઃ ॥ ૧૩॥

રમ્ભાપનસજમ્બીરનારિકેલેક્ષુસારકમ્ ।
સુમોદેત સ વૈ મર્ત્યો મેઘમુક્ત ઇવોડુરાટ્ ॥ ૧૪॥

બુદ્ધિપૂર્વકૃતૈઃ પાપૈસ્તત્ક્ષણાદેવ મુચ્યતે ।
કાપિલેનાથ પયસા યોઽભિષિઞ્ચેન્મહેશ્વરમ્ ॥ ૧૫॥

સ પુનઃ સ્તન્યપયસા સ્વોદરં નાભિષિઞ્ચતિ ।
ઘૃતેન દીપાન્ પ્રજ્વાલ્ય કાર્તિકે તુ વિશેષતઃ ॥ ૧૬॥

સોમવારે ત્રયોદશ્યાં પ્રદોષે પર્વણોર્દ્વયોઃ ।
સઙ્ક્રાન્તૌ ચ વ્યતીપાતે અયને ગ્રહણે તથા ॥ ૧૭॥

દૃષ્ટ્વા દેવ મહાકાલં પૂજ્ય મુક્તો ભવેન્નરઃ ।
શતરુદ્રિયમન્ત્રૈશ્ચ યોઽભિષિઞ્ચેન્મહેશ્વરમ્ ॥ ૧૮॥

ધારાપાત્રૈસ્તથા શ‍ૃઙ્ગૈઃ શઙ્ખૈશ્ચૈવાથ પાણ્ડરૈઃ ।
સહસ્રધારાકલશૈઃ શતધારાદિકૈરપિ ॥ ૧૯॥

શતધારં સહસ્રધારં મન્ત્રૈર્યસ્તભિષિઞ્ચયેત્ ।
શોધિતૈર્વાસિતૈર્નીરૈઃ ધારયા વૃત્તસૂક્ષ્મયા ॥ ૨૦॥

ધારાં શિવશિરોલગ્નામવિચ્છિન્નાં પ્રકલ્પયેત્ ।
સન્તતિં પશુપુત્રાંશ્ચ અવિચ્છિન્નં લભેત્ સઃ ॥ ૨૧॥

સુદુર્લભતરં જ્ઞાનં લભતે નાત્ર સંશયઃ ।
ઇત્થં શૈવેન સંવાદં કૃત્વા બ્રહ્માદયઃ સુરાઃ ॥ ૨૨॥

નારદાદ્યૈર્મુનિશ્રેષ્ઠૈઃ સાર્ધં ગન્ધર્વકિન્નરૈઃ ।
સિતભસ્માક્તતનવો રુદ્રાક્ષવરભૂષણાઃ ॥ ૨૩॥

મહાકાલાલયં દેવા યયુર્બિલ્વાદિપાણયઃ ।
મહાપચિતિસમ્ભારાન્ કામધેનૂધસોદ્ભવૈઃ ॥ ૨૪॥

સફેનક્ષીરધારાભી રુદ્રસૂક્તૈરસેચયન્ ।
દધિમણ્ડૈર્ઘૃતૈર્દિવ્યૈર્મધુના સિતયાઽપિ ચ ॥ ૨૫॥

નારિકેલામ્રસુરસૈઃ મોચાજમ્બીરપાનસૈઃ ।
તત્તદ્રસૈર્મહાદેવં વિવિધૈરભ્યષેચયન્ ॥ ૨૬॥

ગન્ધકર્પૂરપુષ્પોત્થૈઃ સ્વર્ણરત્નકુશોદકૈઃ ।
રૌદ્રૈ ઋક્સામયજુષાં ગણૈરાથર્વણૈરપિ ॥ ૨૭॥

(સ્વર્ણરત્ન જલૈસ્તથા, તલૈસ્તથા)
પઞ્ચબ્રહ્મભિરીશાનં સુગન્ધિં ગન્ધવાસિતૈઃ ।
પયોભિરમૃતાસ્વાદૈઃ પાટલ્યગરુવાસિતૈઃ ॥ ૨૮॥

નાનાવાદિત્રનિનદાન્ નિલિમ્પાઃ સમઘોષયન્ ।
સ્નાલકાલે મહેશસ્ય જયશબ્દૈશ્ચ પુષ્કલૈઃ ॥ ૨૯॥

સ્નાપ્ય વસ્ત્રૈર્વેષ્ટયિત્વા મૃદુકૌશેયસમ્ભવૈઃ ।
ચન્દનેનૈવ સંલિપ્ય લિઙ્ગમાપીઠમુત્તમમ્ ॥ ૩૦॥

નવરત્નચિતાનેકભૂષણૈર્ભૂષયન્ સુરાઃ ।
નિધનેત્યાદિભિર્મન્ત્રૈઃ શ્રીપત્રૈઃ કમલૈસ્તથા ॥ ૩૧॥

આર્ચયંશ્ચમ્પકૈરર્કૈર્મન્દારકરવીરકૈઃ ।
બકૈર્દ્રોણૈશ્ચ ધુત્તૂરૈઃ નીલરક્તોત્પલૈસ્તથા ॥ ૩૨॥

સહસ્રનામભિઃ પુષ્પૈર્ધૂપૈર્દીપૈર્મનોરમૈઃ ।
દીપૈર્વિદીપયામાસુર્મહાકાલશિવાલયમ્ ॥ ૩૩॥

ધૂપૈરગરુજોદ્ભૂતૈઃ ધુમુઘ્ધુમિતદિકતટમ્ ।
નૈવેદ્યૈર્વિવિધૈર્હૃદ્યૈઃ સૂપાપૂપાદિરાશિભિઃ ॥ ૩૪॥

ક્ષીરાજ્યકુમ્ભૈઃ શતશઃ પાયસાનાં ઘટીશતૈઃ ।
દધિખણ્ડાદિભાણ્ડૈશ્ચ શર્કરાપઙ્કપઙ્કિલૈઃ ॥ ૩૫॥

તામ્બૂલપર્વતૈર્નૈ કક્રમુકાનાં ચ રાશિભિઃ ।
મુખવાસકરૈઃરન્યૈર્મૃગનાભિવિરાજિતૈઃ ॥ ૩૬॥

લવઙ્ગૈલામુખરિતૈર્જાજીપત્રફલૈરપિ ।
સ્વચ્છપુચ્છયુતાપારમરીચીખદિરૈસ્તથા ॥ ૩૭॥

નૈવેદ્યમાદ્યં હૃદં ચ દત્વા દિવિષદઃ શિવમ્ ।
નીરાજનૈસ્તથા પુણ્યૈઃ છત્રચામરદર્પણૈઃ ॥ ૩૮॥

વ્યજનૈઃ સન્નિષેવ્યેશં નાનાવાદ્યરવૈરપિ ।
રમ્ભાદ્યપ્સરસસ્તત્ર નનૃતુઃ શઙ્કરાગ્રતઃ ॥ ૩૯॥

જગુશ્ચ દેવગન્ધર્વા નારદાદ્યાશ્ચ ગાયનાઃ ।
મહાદેવ પ્રસીદેતિ શ્રીમન્મૃત્યુઞ્જયેતિ ચ ॥ ૪૦॥

સરાઙ્ગં ચ સતાલં ચ કલં ગીતૈરતોષયન્ ।
મૂર્છનાસ્થાનવિન્યાસૈ રુદ્રવીણાકરાઃ સુરાઃ ॥ ૪૧॥

પ્રદક્ષિણનમસ્કારૈઃ સ્તુતિભિર્નર્તનૈસ્તથા ।
કરતાડનપૂર્વં તે તુષ્ટુવુઃ પરમેશ્વરમ્ ॥ ૪૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મહાકાલક્ષેત્રમહિમા અથવા મહાકાલાર્ચનવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૪। ૮-૪૯॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 4. 8-49..

Notes:
Shiva describes to Gauri; the glory of Mahakala Shiva Kshetra, and the merits of conducting worship of Mahakala especially during certain time periods like Mondays (Somavara), Pradosha of the two Trayodashi-s (Krishna and Shukla), Sankranti-s, Vyatipata (yoga), Ayana, and Eclipses.

The shlokas have been renumbered for readers' convenience.

Proofread by Ruma Dewan

*Mahakala Kshetra Mahima or Mahakalarchana Varnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*